SUB – SANSKRIT                                                                                    SUBJECT CODE - 1135
MAX.MARKS – 80                                                                                    DURATION –3 Hr.

=======================================================================

**सूचनाः-**

प्रश्नपत्रिका भागद्वये विभाजिता अस्ति ।

**प्रथमभागः - वस्तुनिष्ठप्रश्नाः (MCQ -४० गुणाः )**

1)आहत्य ४० प्रश्नाः सन्ति |

2) प्र. क्र. १ तः ४० पर्यन्तं बहुविकल्पप्रश्नाः सन्ति। सर्वे प्रश्नाः अनिवार्याः |

3)प्रत्येकं प्रश्नस्य सूचनानुसारं चतुर्भ्यः प्रदत्त-सम्भावनीयोत्तरेभ्यः योग्यपर्यायं चित्वा लिखत / योग्यपर्यायस्य कृते उत्तरपत्रे चिह्नं कुरुत |

**द्वितीयभागः - सामान्यप्रश्नाः (SUBJECTIVE - ४० गुणाः )**

4) प्रश्नानां क्रमाङ्काः तथा उपप्रश्नानाम् अक्षराणि स्पष्टतया लेखनीयानि |

5) दक्षिणभागे दर्शिताङ्काः गुणाङ्काः सन्ति |

6)सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः |

7)स्वभाषा नाम हिन्दी, मराठी, कोंकणी, आङ्ग्लभाषा वा |

=======================================================================

**प्रथमभागः**

=======================================================================

- **अधोलिखितं गद्यखण्डं पठित्वा प्रदत्तप्रश्नानाम् उचितानि उत्तराणि चिनुत।(1 तः 8 पर्यन्तम् )**

नागार्जुनः कश्चित् रसायनशास्त्रज्ञः प्रसिद्धः चिकित्सकः च आसीत् | देशविदेशेषु तस्य कीर्तिः प्रसृता आसीत् |सः प्रयोगशालायां अहोरात्रं कार्यंकरोति स्म | तेन सः बहूनि औषधानि अन्विष्टवान् | एकदा नागार्जुनस्य कृते साहायार्थं मनुष्यस्य आवश्यकता आसीत् | अतः सः सहाय्यकरूपेण जनान् अपृच्छत् | तदा द्वौ युवकौ आगच्छताम् | परन्तु तस्य कृते एकः एव साहाय्यकः अपेक्षितः आसीत् | अतः सः तयोः परीक्षां कर्तुं निश्चयं अकरोत् | नागार्जुनः तयोः विद्याभ्यासविषये पृष्टवान् तस्मिन् विषये अपि द्वौ अपि समानौ आस्ताम् | अतः नागार्जुनः उभाभ्याम् अपि एकैकं वस्तु दत्वा प्रत्येकं अवदत् – " इदं वस्तु गृहं नयतु | अनेन एकं रसायनं निर्माय आनयतु | श्वः ,मां मिलतु च "|एतत् श्रुत्वा श्वः नागार्जुनः मामेव स्वीकरिष्यति इति उभयोः विश्वासः अभवत्| अन्यस्मिन् दिने यदा तौ राजप्रासादं आगतवन्तौ तदा एकः रसायनं निर्माय आगतवान् अतः प्रसन्नः आसीत् परन्तु अन्यः दुःखितः आसीत् |तदा नागार्जुनः पृष्टवान् भवान् किमर्थं दुःखितः अस्ति ? तदा सः अवदत् यत् – महाराज ! यदा अहं ह्यः गृहं गच्छन् आसम् तदा राजमार्गे एव अहं एकं वृद्धं अपश्यम् | मम अग्रे एषः अगच्छत् परन्तु तस्य साहाय्यं न अकरोत् | तस्य वृद्धस्य परिस्थितिः शोचनीया आसीत् | अहं तं चिकित्सालयं अनयत् |तस्य सेवां कृतवान् | अतः मया रसायननिर्माणार्थं समयः एव न प्राप्तः | तस्य वचः श्रुत्वा नागार्जुनः विचारं अकरोत् यत् सेवाभावनां विना उत्तमः चिकित्सकः कथं भवेत् ? इति | अतः सः द्वितीयं एव यः वृद्धस्य सेवां अकरोत् तस्य साहाय्यकरूपेण नियुक्तिं अकरोत् |

**प्रश्नाः**

1)नागार्जुनः उभाभ्यामपि एकैकं वस्तु किमर्थं अयछत् ?

A)पूजां कर्तुम्          B)क्रीडितुम्          C) परीक्षां कर्तुम्          D)दर्शनं कर्तुम्

2)नागार्जुनः प्रयोगशालायां कार्यं कृत्वा किं अकरोत् ?

A)सूचनानाम् अन्वेषणं          B) पुस्तकानाम् अन्वेषणं

C)क्रीडनकानाम् अन्वेषणं          D)औषधानाम् अन्वेषणं

3)द्वितीयः किमर्थं दुःखितः आसीत् ?

A)यतः सः रसायनं कृतवान्
B)यतः सः वृद्धस्य साहाय्यं न कृतवान्
C) यतः सः रसायनं न कृतवान्
D)यतः सः नाटकं कृतवान्

4)नागार्जुनः कः असीत् ?

A) रसायनशास्त्रज्ञः प्रसिद्धः शिक्षकः च
B) रसायनशास्त्रज्ञः प्रसिद्धः चिकित्सकः च
C) रसायनशास्त्रज्ञः प्रसिद्धः लेखकः च
D) रसायनशास्त्रज्ञः प्रसिद्धः नाटककारः च

5) कस्य परिस्थितिः शोचनीया आसीत् ?

A)वृद्धस्य
B)नृपस्य
C) नागार्जुनस्य
D)रुग्णस्य

6) द्वितीयस्य वचः श्रुत्वा नागार्जुनः किं विचारं अकरोत् ?

A) दानेन विना उत्तमः चिकित्सकः कथं भवेत् ? इति ।
B) ज्ञानेन विना उत्तमः चिकित्सकः कथं भवेत् ? इति ।
C) सेवाभावनां विना उत्तमः शिष्यः कथं भवेत् ? इति ।
D) सेवाभावनां विना उत्तमः चिकित्सकः कथं भवेत् ? इति ।

7) वस्तु प्राप्य उभयोः अपि कः विचारः आसीत् ?

A) श्वः नागार्जुनः मामेव स्वीकरिष्यति इति ।
B) श्वः नागार्जुनः माम् न स्वीकरिष्यति इति ।
C) श्वः नागार्जुनः अन्यत् वस्तु दास्यति इति ।
D) श्वः नागार्जुनः माम् धनम् दास्यति इति ।

8) नागार्जुनः कस्य साहाय्यकरूपेण नियुक्तिं अकरोत् ?

A) यः वृद्धस्य सेवां न अकरोत्
B) यः वृद्धस्य सेवां अकरोत्
C) यः नागार्जुनस्य सेवां अकरोत्
D) एव यः देवस्य पूजां अकरोत

- **अधोलोखितं गद्यखण्डं पठित्वा प्रदत्तप्रश्नानाम् उचितानि उत्तराणि चिनुत।( 9 तः 16 पर्यन्तम् )**

भारतवर्षे अनेकाः नद्यः प्रवहन्ति , तासु सर्वासु एव गङ्गा श्रेष्ठा,पुण्यतमा च नदी अस्ति। अतः एव एषा सुरस्रित्, सुरनदी आदिभिः नामभिः प्रसिद्धा अस्ति।जाह्नवी, भागीरथी हैमवती इत्यानि अस्याः अन्यानि नामानि सन्ति।अस्या उद्गमविषये पौराणिकी कथा प्रचलिता अस्ति यत् महाराजः भगीरथः स्वपूर्वजानाम् उद्धाराय तपसः बलेन एनां नदीं पृथ्वीम् आनयत् इति।अतः अस्याः नाम भागीरथी इति प्रसिद्धम् अभवत्।भौगोलिकदृष्ट्या इयं गङ्गा हिमालयस्य गङ्गोत्तरी इति स्थानादुद्भवति। गङ्गाजनेन अन्यनदीनां जलेन च विद्युतः उत्पादनमपि क्रियते। तथा च एतस्याः जलस्य उपयोगः कृषिसिञ्चनार्थं अपि भवति।गङ्गातटे बहूनि प्रसिद्धानि नगराणि अपि सन्ति।तेषु प्रयागः, वाराणसी, हरिद्वारम्, प्रयागः च नगराणि सन्ति। अस्मिन् स्थाने जनाः पवित्रजले स्नानं कुर्वन्ति।गङ्गायाः पवित्रजलस्य स्नानेन पापानां प्रक्षालनं भवति इति जनाः विश्वासं कुर्वन्ति।विदेशीयाः अपि गङ्गाजलम् अमृततुल्यम् इव् मन्यन्ते। गङ्गायाः तीरे हरिद्वारादिषु तीर्थस्थानेषु सुन्दराणि मन्दिराणि सन्ति। अस्याः तटे सर्वदा एव तालघण्टामृदङ्गादीनां शब्दाः श्रूयन्ते।तत्र कुत्रचित् तपस्विनः तपः आचरन्ति, क्वचित् भक्ताः ईश्वरं ध्यायन्ति, क्वचित् साधकाः साधनां कुर्वन्ति तु क्वचित् बटवः वेदाध्ययनं च कुर्वन्ति। कवयः अस्याः माहात्म्यं गायन्ति च।

प्रश्नाः

9)जनाः किं विश्वासं कुर्वन्ति ?

A) गङ्गायाः पवित्रजलस्य स्नानेन पापानां प्रक्षालनं भवति इति
B) गङ्गायाः पवित्रजलस्य सिञ्चनेन पापानां प्रक्षालनं भवति इति
C) गङ्गायाः पवित्रजलस्य विद्युतः निर्माणेन पापानां प्रक्षालनं भवति इति
D) गङ्गायाः पवित्रजलस्य पानेन पापानां प्रक्षालनं भवति इति

10)गङ्गानदी कीदृशी नदी अस्ति ?

A)मनोहरा B)सुरनदी C) श्रेष्ठा पुण्यतमा च D)विख्याता

11)भगीरथः गङ्गां किमर्थं पृथ्वीम् आनयत् ?

A) तपश्चर्यां कर्तुं B)स्नानं कर्तुं C) पराक्रमं कर्तुं D) स्वपूर्वजानाम् उद्धारं कर्तुम्

12)सुन्दराणि मन्दिराणि कुत्र सन्ति ?

A)सर्वत्र B) हरिद्वारादिषु तीर्थस्थानेषु C)हिमालये D)गङ्गानद्यां

13)गङ्गायाः उद्गमः कस्मात् स्थानात् अभवत् ?

A)सह्याद्रिपर्वतात् B)गोवाराज्यात् C) हरिद्वारात् D)गङ्गोत्तरीस्थानात्

14)गङ्गानद्याः माहात्म्यं के गायन्ति ?

A)पक्षिणः B)पशवः C) बटवः D)कवयः

15)गङ्गाजलेन कस्याः निर्माणं भवति ?

A) विद्युतः B) शाटिकायाः C) तीर्थस्य D)मनुष्यस्य

16)विदेशीयाः अपि गङ्गानद्याः जलं किम् इव मन्यन्ते ?

A) आम्ररसम् B)फलम् C) अमृततुल्यम् D)पुण्यम्

**17) ‘ रघुम् + एव ’ इत्यस्य सन्धिः किम् ?**

A) रघुमैव B) रघुमोव C) रघ्वैव D) रघुमेव

**18) “ व्याकुलाभवत् ” सन्धिविच्छेदं किम् ?**

A) व्याकुला + भवत् B) व्याकुला + अभवत्
C) व्याकुलः + अभवत् D) व्याकुला + आभवत्

- **रेखाङ्कितपदस्य स्थाने उचितं प्रश्नवाचकं पदं चिनुत ।**

**19) सन्देशस्य समीपे पञ्च गीतपुस्तकानि सन्ति ।**

A) केन B) कदा C) कति D) किमर्थम्

20) बालकः विद्यालयं गच्छति ।
A) कुत्र B) कस्य C) कुतः D) कं

21) मुनेः नाम वाल्मीकिः आसीत् ।
A) कः B) किम् C) का D) कस्य

- रिक्तस्थाने उचितं पदं चिनुत।

22) रघुः चतुर्दशकोटिं -----( प्र + दा – ल्यबन्तम् अव्ययं )------- बटुकौत्सं सत्कृतवान् ।
A) आप्तुम् B) प्राप्य C) प्रदाय D) प्रणम्य

23) कृ धातोः त्वा प्रत्ययान्तरूपं किम् ? ( क्त्वान्तम् अव्ययम् ) ? ।
A) गत्वा B) कर्तयित्वा C) कृष्ट्वा D) कृत्वा

- रिक्तस्थाने उचितानि पदानि चिनुत । (24 तः 27 पर्यन्तम् )

24) वसुधा -------------- उचितान्तरे भवति ।
A) सूर्यस्य B) सूर्यः C) सूर्यात् D) सूर्येण

25) शिक्षकः छात्राय प्रश्नं ------------- ।
A) अपृछन् B) अपृच्छत् C) अपृच्छम् D) अपृच्छाम

26) पृथिवी नाम अन्तरिक्षे विद्यमान ---------- लघुः ग्रहः अस्ति।
A) एकः B) एका C) एकम् D) एक

27) रमेशः मित्रं वदति – भवान् मह्यं लेखनीं -------------।
A) यच्छानि B) यच्छ C) यच्छतु D) यच्छन्तु

28) मम माता अद्य पणजीनगरं---------------- । भविष्यत्कालीनरूपं चिनुत ।
A) अगच्छत् B) गच्छति C) गच्छतु D) गमिष्यति

29) " आकाशम् " इत्यस्य उचितं पर्यायपदं चिनुत ।
A) जलम् B) नभः C) सगरः D) मेघः

30) " निद्रा " इत्यस्य उचितं पर्यायपदं चिनुत ।
A)रजनी B) दिवसः C) शयनं D) नयनम्

31) "अन्तः " इत्यस्य विलोमपदं चिनुत ।
A)यमः B) मृत्युः C) आदिः D) दोषः

32) " धर्मः " इत्यस्य विलोमपदं चिनुत ।
A) अज्ञानम् B) अविकासः C) अनादरः D) अधर्मः

- उचितम् उत्तरं चिनुत। ( 33 त: 40 पर्यन्तम् )

33) सूर्यमालायां कति ग्रहाः प्रदक्षिणां कुर्वन्ति ?

A) तिस्रः B) नव C) दश D) द्वादश

34) द्विजिह्वाऽपि सर्पिणी का नास्ति ?

A) लेखनी B) सूची C) कूपी D) मार्जनी

35) रघुः कस्मिन् यज्ञे सर्वस्वं दत्तवान् ?

A) पुत्रकामेष्टियज्ञे B) अग्निष्टोमयज्ञे C) विश्वजित्-यज्ञे D) कामेष्टियज्ञे

36) 'गजानन' इति शब्दस्य अन्त्याक्षरेण राधा किं पदं कथयति ?

A) नयनम् B) नर्तकी C)नमस्कारः D) नटी

37) वाल्मीकिः कैः सह तमसानदीम् अगच्छत् ?

A) भक्तैः B) शिष्यैः C) देवैः D) सेवकैः

38) धीमतां कालः कथं गच्छति ?

A) काव्यशास्त्रविनोदेन B)निद्रया C)भोजनेन D) अतिपरिचयात्

39) वरतन्तोः आश्रमे के अपठन् ?

A)कर्मकराः B)देवाः C) देव्यः D) बटवः

40रामायणीकथा कीदृशी अस्ति ?

A) सङ्गीतबद्धा B) गीतबद्धा C) श्लोकबद्धा D) सूत्रबद्धा

=============================================================

# द्वितीयभागः

==========================================================================

➢ **अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत।**

विद्याध्ययनं समाप्य गुरुदक्षिणां दातुमुत्सुकः कौत्सः गुरुमुपगम्य सविनयं स्वसङ्कल्पं न्यवेदयत्। तस्य वचः श्रुत्वा गुरुणा कथितम् –" वत्स ! तव विनयेन ज्ञानेन सेवया च परं प्रीतोऽस्मि। न कामये अन्यां काञ्चिद् दक्षिणाम्। गच्छ , स्वस्ति तुभ्यम्।' गुरुणा प्रबोधितोऽपि कौत्सः वारं वारं दक्षिणार्थं न्यवेदयत्। तस्य आग्रहं दृष्ट्वा तस्य योग्यतां परीक्षितुं वरतन्तुः अकथयत्। "चतुर्दशविद्याः त्वया मत्पार्श्वात् गृहीताः। अत एव चतुर्दशकोटीः स्वर्णमुद्राः आनय।"

**प्रश्नाः**

41)कौत्सस्य योग्यतां परीक्षितुं वरतन्तुः किम् अकरोत् ?(दशपदैः उत्तरत) (2)

42)कौत्सस्य सङ्कल्पं श्रुत्वा वरतन्तुना किं कथितम् ? (दशपदैः उत्तरत) (2)

➢ **प्रश्नानाम् उत्तराणि स्वभाषया लिखत।**

43) पृथ्वीग्रहे एव जीवसृष्टिः किमर्थं प्रादुर्भूता ? (2)

अथवा

रामायणे कानि जीवनमूल्यानि वर्णितानि सन्ति ?

44) रघोः आक्रमणात् पूर्वं कुबेरः किम् अकरोत् ? (2)

अथवा

शिक्षकः छात्रेभ्यः स्पर्धाविषये कान् नियमान् वदति ?

➢ **अधस्तनवाक्यानि कः कं प्रति अवदत् इति लिखित्वा पाठस्य नाम च लिखत।**

45) "भगवतः रामस्य पुण्यं चरितं विदित्वा लोकाः सन्मार्गस्य अनुसरणं कुर्युः।" (2)

46) " क्रीडायाः नाम किम् ? " (2)

➢ **वाक्यांशयोः मेलनं कृत्वा लिखत।**

| 'अ'स्तम्भः | 'आ'स्तम्भः |
|---|---|
| 47)यत्क्रौञ्चमिथुनादेकं (1)<br>48)माता मे पृथिवी (1) | ➢ पुत्रोऽहं पृथिव्याः।<br>➢ यदि जानासि तद्वद।<br>➢ अवधीः काममोहितम्। |

➢ **पद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत।**

किम्मिष्टमन्नं खरसूकराणां किं रत्नहारो मृगपक्षिणां च।
अन्धस्य दीपो बधिरस्य गीतं मूर्खस्य किं शास्त्रकथाप्रसङ्गः॥
प्रदोषे दीपश्चन्द्रः प्रभाते दीपको रविः।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः॥

**प्रश्नाः**

49)प्रदोषे, प्रभाते त्रैलोक्ये च कः दीपकः भवति ? (दशपदैः उत्तरत ) (2)

50) खरसूकराणां मृगपक्षिणां अन्धस्य च कृते कस्य उपयोगः न भवति ? (दशपदैः उत्तरत) (2)

➢ **<u>एकस्य</u> सुभाषितस्य अनुवादं स्वभाषया लिखत।** (2)

51) अतिपरिचयादवज्ञा सन्ततगमनादनादरो भवति।
मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते॥

अथवा

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
स क्रमः सर्वविद्यानां धर्मस्य च धनस्य च॥

➢ **सुभाषितानि पूर्णानि, शुद्धानि च लिखत।**

52)कृष्णमुखी-----------------------|---------------------------|| (2)

53)मेघश्यामो-----------------------|---------------------------|| (2)

➢ **54)कोष्ठकात् उचितपदानि चित्वा चत्वारि सार्थकवाक्यानि लिखत।** (4)

| | | | |
|---|---|---|---|
| वानराः | नाटकं | अस्ति | (1) |
| सुधाखण्डः | वृक्षे | पठतम् | (1) |
| अहं | वार्तापत्रिकां | कूर्दन्ति | (1) |
| युवां | उत्पीठिकायां | करिष्यामि | (1) |

➢ **55)मञ्जूषायां दत्तपदानां साहाय्येन कथापूर्तिं कृत्वा कथां पुनः लिखत।** (4)

( अस्वस्थचित्ता ,अकरोत्, पिधानम्, पुरतः, गन्तुम्, प्रशंसा, दुर्गं, शिवभूपस्य )

महाराष्ट्रराज्ये रायगडः नाम सूप्रसिद्धः दुर्गः अस्ति।एकदा हिरकणी दुग्धविक्रयार्थं रायदुर्गं --------------- उत्सुका आसीत्।किन्तु तस्याः शिशुः निद्रां न ------------ ।परन्तु यदा दोलारूढः शिशुः सुप्तः तदा हिरकणी -----------प्रस्थिता।दुर्गे दुग्धविक्रयार्थं अधिकः समयः अभवत्। नियमानुसारं सुर्यास्तसमये दुर्गद्वाराणां -----------अभवत्।तदा सा रक्षापुरुषं द्वारं उद्घाटयितुं अप्रार्थयत्। परन्तु दुर्गद्वारं सुर्योदयात् परमेव उद्घाटनीयं इति---------------- आज्ञाकारणात् सः द्वारोद्घाटनं न अकरोत्।शिशोः चिन्तया ---------------सा इतस्ततः अभ्रमत्।तस्याः नयनयोः ----------केवलं तस्याः शिशुः आसीत्।तदा पुत्रस्नेहेन सा अकस्मात् तटात् अवतरणं कृत्वा गृहं प्रति अगच्छत्। तस्याः वृत्तं श्रुत्वा शिवभूपेन तस्याः केवलं -------------- कृता तु तस्यै पारितोषिकमपि दत्तम्।

➢ **56)अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत।** (4)

- माता अवदत् – तर्हि अहं वस्त्रेण मार्जयामि ।
- पूजासमाप्तेः अनन्तरं माता श्यामं अवदत् यत् “यथा त्वं चरणौ स्वच्छं स्थापयितुं प्रयत्नं करोषि तथैव स्वमनः मलिनं न भवेत् तदर्थमपि प्रयत्नं कुरु।”
- स्नानानन्तरं तस्य माता तं देवपूजार्थं पुष्पाणि आनेतुं उक्तवती।
- सानेगुरुजीमहोदयः ( श्यामः ) स्वजीवनस्य काचित् कथा कथयितुम् आरम्भं कृतवान्।
- तदा सः अवदत् यत् “अम्ब ! मम पादतलौ आर्द्रौ स्तः अतः मृत्तिकया मलिनौ भविष्यतः।
  एवं प्रकारेण श्यामस्य माता तस्योपरि मधुरशब्दैः संस्कारं अकरोत्।
- एकदा सायङ्काले श्यामः खेलनात्परं स्नातुम् अगच्छत्।
- परन्तु श्यामस्य हठस्वभावकारणात् अम्बया स्वशाटिकाञ्चलं विस्तारितं तदा तस्य पादौ शुष्कौ अभवताम्।

➢ 57)चित्रम् आधृत्य कोष्ठकस्थपदानां साहाय्येन संस्कृतभाषया अष्ट वाक्यानि लिखत। (4)

( यात्रिकाः, बसस्थानकम्, शुनकः,खादति, भारवाहकः, सूचनाफलकम्,वर्तमानपत्रम्, अवकरपात्रम् )




==============================समाप्तम् ==============================